पदन्यासः १ । श्रीविद्याविषये वश्चिन्यादि १ नवयोन्यात्मक २ पीठ ३ तत्त्व ४ पञ्चदशी ५ षोड़शी ६ संहार ७ स्थिति ८ सृष्टि ९ नाद १० षोढ़ा ११ गणेश १२ ग्रह १३ नक्षत्र १४ योगिनी १५ राशि १६ त्रिपुरा १७ षोड़शनित्या १८ कामरति १९ सृष्टिस्थिति २० प्रकटयोगिनी २१ आयुध २२ न्यासाः । ताराविषये रुद्र १ ग्रह २ लोकपाल ३ न्यासाः । एतेषां प्रमाणानि तन्त्रसारादौ द्रष्टव्यानि ॥

न्युङ्खः, पुं, ( न्युङ्खते इति । नि+उङ्ख गतौ+घञ् । ) सामवेदे नियतप्रणवषट्कम् । दीर्घवानयमिति नयनानन्दः । इत्यमरभरतौ ॥ सम्यक् । मनोज्ञः । इति मेदिनी । खे, २ ॥

न्युब्जं, क्ली, ( न्युब्जति अधोमुखीभवतीति । नि+उब्ज+अच् । ) कर्म्मरङ्गफलम् । इति मेदिनी । जे, १२ ॥ श्राद्धादिपात्रभेदः । इति शब्दरत्नावली ॥ तथा च गोभिलः । प्रथमे पात्रे संस्रवान् समवनीय पात्रं न्युब्जं कुर्य्यात् पितृभ्यः स्थानमसीति । प्रथमे पात्रे पितृपात्रे । संस्रवान् पितामहादिपश्चार्घपात्रस्थशेषजलानि । समवनीय क्रमेण स्थापयित्वा तत्पात्रस्य प्रपितामहपात्रेणाच्छादनमाह शौनकः । प्रपितामहपात्रेण पिधाय प्रतिष्ठापयतीति । याज्ञवल्क्येनापि तत्पात्रस्याधःस्थत्वाभिधानात् पात्रान्तरेण पिधानमाक्षिप्तम् । तथा च याज्ञवल्क्यः ।

"दत्त्वार्घ्यं संस्रवांस्तेषां पात्रे कृत्वा विधानतः ।
पितृभ्यः स्थानमसीति न्युब्जं पात्रं करोत्यधः ॥"

विधानतः यथापूर्व्वं स्थापितं क्रमेण । तेन प्रपितामहपात्रेणाधःकृतं पितृपात्रं ऊर्द्ध्वमुखमवस्थितं न्युब्जं करोति । तन्न्यासश्च । पितृपात्रे निधायाथ न्युब्जमुत्तरतो न्यसेत् । इति मत्स्यपुराणवचने न्यसेदित्यत्राख्यातोपस्थापितकर्त्तुर्व्वामपार्श्वे कर्त्तव्यः । इति श्राद्धतत्त्वम् ॥

न्युब्जः, पुं, ( नि+उब्ज+अच् । ) दर्भमयस्रुक् । इति मेदिनी । जे, ११ ॥ ( यथा,—

"शयनासनयानानामुत्तानानान्तु दर्शनम् ।
न्युब्जानामितरेषाञ्च पात्रादीनामशोभनम् ॥"
इति वाभटे शारीरस्थाने । ६ । २३ ॥ )

कुशः । स्रुक् । इति हेमचन्द्रः ॥

न्युब्जः, त्रि, ( न्युब्जति अधोमुखीभवतीति । नि+उब्ज+अच् । ) कुब्जः । अधोमुखः । इति मेदिनी । जे, १२ ॥ ( यथा, हरिवंशे । ६१ । ६ ।

"स तत्रैकेन पादेन शकटं पर्य्यवर्त्तयत् ।
न्युब्जं पयोधराकाङ्क्षी चकार च रुरोद च ॥")

रुजा शुग्नः । इत्यमरः । २ । ६ । ६१ ॥ रोगेण वक्रीकृतपृष्ठाधोमुखपुरुषादिः । इति भरतः ॥

न्युब्जखड्गः, पुं, ( न्युब्जः खड्गः । ) कुब्जखड्गः । बाँका तरवार इति भाषा ॥ तत्पर्य्यायः । कटीतलः २ । इति त्रिकाण्डशेषः ॥

न्यूनं, त्रि, ( न्यूनयति । नि+ऊन परिहाणौ+अच् । ) गर्ह्यम् । ( यथा, महाभारते । १३ । १४३ । ४६ ।

"एतैः कर्म्मफलैर्द्देवि ! न्यूनजातिकुलोद्भवः ।
शूद्रोऽप्यागमसम्पन्नो द्विजो भवति संस्कृतः ॥")

ऊनम् । इत्यमरः । ३ । ३ । १२७ ॥ ( यथा, मनुः । ८ । २०३ ।

"नान्यदन्येन संसृष्टरूपं विक्रयमर्हति ।
न चासारं न च न्यूनं न दूरे न तिरोहितम् ॥")

न्यूनपञ्चाशद्भावः, पुं, ( न्यूनपञ्चाशतः ऊनपञ्चाशद्वायूनां भावो यत्र । ) ऊनपञ्चाशद्भावः । पागल इत्यर्थः । यथा,—

"उदीरितेन्द्रियो धाता वीक्षाञ्चक्रे यदात्मजाम् ।
तदैव न्यूनपञ्चाशद्भावा जाताः शरीरतः ॥"
इति कालिकापुराणे द्वितीयाध्यायः ॥

नृस्थिमाली, [ न् ] पुं, ( नृणामस्थिमाला नृस्थिमाला सा अस्त्यस्येति । इनिः । ) शिवः । इति त्रिकाण्डशेषः ॥ नरास्थिमालाविशिष्टे, त्रि ॥

Skylark Printers
K 2/8 MODEL TOWN | DELHI - 9

II 118